M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. / Sur. 418

Title: Vrishotsarga Paddhati

418

वृषोत्सर्ग पद्धति।

		Vrishotsarga Paddhati.	Title
		Nārāyana Bhatta son of	Author
		Rameshwar Bhatta	Editor
			Year, Vols.
			Publisher
418			Remarks

॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥अथवृषोत्सर्गपद्धतिः प्रारभ्यते॥ ॥श्रीशुभंभवतु॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥

॥ वृ०प० ॥ श्रीगणेशाय नमः ॥ अथ शौनकोक्तमार्गेण वृषोत्सर्गपद्धतिर्लिख्यते ॥ तत्रादौ वृषलक्षणं ॥ जीववत्सा
याः पयस्विन्याः पुत्रं त्रिहायनं द्विहायनमेकहायनं वा नीलं बभ्रुं कपिलं पिंगलं कृष्णं लोहितं श्वेतं वा एकवर्ण
॥ १ ॥ मनेकवर्णं वा अव्यंगं जीवन्मातृकं यथासंभवं वा यो वा पुच्छं छादयति तं वृषमुत्सृजेत् ॥ यद्वा ॥ लोहितो
यस्तु वर्णेन मुखे पुच्छे च पांडुरः ॥ श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ॥ चरणास्यमुखं पुच्छं यस्य श्वे
तानि गोपते ॥ लाक्षया समवर्णश्च स नीलो वृष उच्यते ॥ २ ॥ कार्त्तिक्यां पौर्णमास्यां वैशाख्यां माघ्यां आ
श्वयुज्यां अन्यस्यां वा ऽष्टकासु चंद्रसूर्यग्रहणे विषुवती तुलामेषयोरेनयोर्मृतेकादशाहे यथासंभवं शु
भसमये वोत्सृजेत् ॥ ॥ अथ प्रयोगः ॥ अथ द्विगृहे गोष्ठे तीर्थे शिवालये पुण्यक्षेत्रे वा यथाशास्त्र
ध्वेवा पताकाध्वजशोभितं षोडशस्तंभसमं उपच्छायामात्रं वा कृत्वा तन्मध्ये ईशानभागे वेदिमष्टहस्तां चतुर्ह ॥ १ ॥
स्तां वा सुशोभितां कृत्वा ॥ कृताह्निकः पूर्वाह्णे कृताभ्यंगः श्वेतं देशकालौ संस्मृत्वा मम समस्तपितॄणा
मुद्धरार्थं अमुककामनासिध्यर्थं वा वृषोत्सर्गाख्यं कर्म श्वः सद्यो वा करिष्ये इति संकल्प्य ॥ तदंगं गणेश

गौर्यादिपूजनं पुण्याहवाचनादि करिष्ये इति संकल्प्य षोडशोपचारैर्गणपतिं कुलदेवतां चार्चयित्वा स्व
शाखानुसारेण पुण्याहवाचनं कृत्वा पीठोपरि नूतनवस्त्रे तंडुलपुंजेषु एता देवताः स्थापयेत् ॥ ॐ गण
पतिं स्थापयामि ॥ ॐ गौरीं १ पद्मां २ शचीं ३ मेधां ४ सावित्रीं ५ विजयां ६ जयां ७ देवसेनां ८ स्वा
हां ९ स्वधां १० मातॄः ११ लोकमातॄः १२ धृतिं १३ पुष्टिं १४ तुष्टिं १५ आत्मनः कुलदेवतां १६ ॥ तदस्तां
मित्रावरुणा त्वेताः प्रतिष्ठाप्य ॥ यथामीलितोपचारैः संपूज्य ब्राह्मणैर्न्यूनातिरिक्तं पूजनं परिपूर्ण
मस्त्विति वाचयित्वा वृद्धिश्राद्धं कृत्वा आचार्यं वरयेत् ॥ ततस्तेन सहितो मंडपदेवतां प्रतिष्ठाप्य पता
कादि तत्तन्मंत्रैः स्थापयेत् ॥ एतस्मिन्नहनि नवग्रहमखमपि केचिदिच्छंति ॥ ततो वृषस्य वत्सतरीणां चतसृणां
च द्वयोरेकस्य वा यथालाभं मांगलिकस्नानादि कारयित्वा ब्राह्मणान्भोजयित्वा यजमानो हविष्यं भुंजी
त ॥ ततः श्वोभूते कृतनित्यक्रियो वेदेरुपरि हस्तमात्रं स्थंडिलं विधाय देशकालौ स्मृत्वा उपक्रांतं वृषो
त्सर्गमहं करिष्ये ॥ तदंगमग्निस्थापनादि करिष्ये इति संकल्प्य पंचभूसंस्कारपूर्वकमग्निं स्थापयेत् ॥

॥ रु०प०॥ स्वयं रतो वा सआचार्यैः सहाधिवासनं वा कार्यं ॥ अग्निस्थापनदेशादीशान्यां पीठस्योपरि पंचगोमातरः पूज्याः ॥ ॐ नंदां स्था
॥ २ ॥ पयामि १ सुमनसां २ सुभद्रां ३ नीलां ४ सुरभिं ५ एताः संपूज्य तासामग्रे धान्योपरि नवमृन्मयं रुद्रकलशं वस्त्रवेष्टितं पं
चरत्नपंचपल्लवहिरण्यादियुतं ॥ आ कलशेषु धावतिस्थापयित्वा इमं मे गंगे इति शुद्धोदकेनापूर्य तदुपरि ताम्रवंशादिमयभाज
ने यथाशक्तिसुवर्णनिर्मितां रुद्रप्रतिमां स्थापयित्वा संपूज्य एकेन ब्राह्मणेन रुद्रजपेनानुमंत्रणं कारयेत् ॥ ततो वत्सतरीभिः
सह वृषं शुद्धोदकेनापो हि ष्ठा कयानुइति सूक्ताभ्यामभिषिंचेत् ॥ आपो हि ष्ठेति नवर्चस्य सूक्तस्यांबरीषः सिंधुद्वीप आपो गाय
त्रीपंचमीवर्धमाना सप्तमी प्रतिष्ठा अंत्ये द्वे अनुष्टुभौ० वृषवत्सतर्यभिषेके विनियोगः ॥ कया नश्चित्र इति त्र्यर्चस्य वाम प
देव इंद्रो गायत्री ॥ अभी षुण इति पादनिचृत् ॥ अभिषे० ॥ ततो वत्सवृषतं गंधमाल्यैरलंकृत्य अन्वाधानं करिष्ये इति संकल्प्य देवता
परिग्रहार्थमित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा ऽत्र प्रधानं रुद्रं चरुद्रव्येण ॥ सोमं पायसेन ॥ इंद्रं यावकेन शेषेण स्विष्टकृतमि
त्याद्युक्त्वा एवं सांगापरांगेन कर्मणा सद्यो यक्ष्ये इत्यंतमुक्त्वा अन्वाधानपरिसमूहनादि पूर्णपात्रनिधानांतं कृत्वा रुद्राय त्वा
जुष्टं निर्वपामीत्यादि निर्वापप्रोक्षणादि क्रमेण चरुनिर्वापादि श्रपणांतं कृत्वा ऽवदानधानधर्मेण जुहुयात् ॥ ॐ रुद्राय स्वाहा ॥ २ ॥
रुद्रायेदं न मम ॥ इति चरुं० ॥ सोमाय स्वाहेति पायसं ॥ इंद्राय स्वाहेति यावकं ॥ ततः स्विष्टकृदादि परिसमूहनांतं कृत्वा ॥

अलंकृत्वा ॥ ततस्त्रीभिर्विवाहाय कृतमंगलं वृषं प्रादक्षिण्येन वेदेरुत्तरतो नीलां प्राङ्मुखं वृषं स्वयमुदङ्मुखो
मधुपर्केण यथाम्नायं संपूजयेत् ॥ ततो ऽलंकरणे वृषं क्षपयित्वा वस्त्रछत्रोपानत्कांस्यभाजनादि मनःपात्राणि य
थाशक्ति समर्प्य माल्यहरिद्राकुंकुमादिना अलंकृत्य ॥ ततो दक्षिणउरो तप्तेन राजतत्रिशूलेनांकयित्वा वा
मेरौ कर्णे चक्रेणांकयेत् ॥ असावेवायसाभ्यां ॥ उत्सर्गकाले चांकनं अशक्तिपक्षे कनार्थे चिह्नमात्रं कार्यं
अस्मिन्काले ॥ ततो वृषेन्यासः ॥ इषे त्वेति मूर्ध्नि ॥ इमा रुद्रायेति शूलांके ॥ नमस्ते रुद्रेति चक्रांके ॥ सहस्रा
णीति ललाटे ॥ विष्णातिति ॥ त्र्यंबकमिति वा नेत्रयोः ॥ मानस्तोकेति नासिकायां ॥ अवतत्येति मुखे
नीलग्रीवा इति कंठे ॥ मर्माणीति बाहुमध्यतः ॥ समिधाग्निमिति बाह्वोः ॥ नमो वः किरिकेभ्य इति
हृदि ॥ हिरण्यगर्भ इति नाभौ ॥ मीढुष्टमेति कट्यां ॥ मानो महांतमिति ऊर्वोः ॥ उडुत्यमिति जंघयोः ॥ इमा
रुद्रायेति जान्वोः ॥ रक्षोहणमिति गुदे ॥ वृष्णस्ते इति लिंगे ॥ त्र्यंषणंमिति पुच्छे ॥ त्रिपादूर्ध्व इति खुरेषु
एवं वेदसमानीयामन्त्रपश्चिमभागे स्वगृह्योक्तविधिना सर्वविवाहं चतुर्भिर्वत्सतरीभिः सह कु

॥ वृ० प ॥ यात्॥ तत्रप्रयोगः॥ देशकालौ संकीर्त्य मम सर्वेषां पूर्वजानां निरतिशयानंदब्रह्मलोकावाप्त्यर्थं अमुककामनया
॥ ५ ॥ श्रीरुद्रस्वरूपिणे वृषाय वत्सतरीकन्यादानमहं करिष्य इति संकल्प्य दीर्घमायुरस्त्वित्यादि सर्वं वृषपरत्वेन कार्यं
ततः पूर्ववत्संकल्प्य रुद्रस्वरूपाय वृषाय गौरीस्वरूपा इमा यथाशक्त्या अलंकृता वत्सतरीस्तुभ्यमहं संप्रददे
अनेन वत्सतरीदानेन भगवान्वृषस्वरूपी श्रीरुद्रः प्रीयतामिति उक्त्वा॥ अस्य नीकोद्वाहस्य प्रतिष्ठासिध्यर्थं इ
दं हिरण्यं दक्षिणात्वेन संप्रददे॥ एवं कन्यादानं यथाग्र्यं च कार्यं॥ ततो वृषवत्सतरीणामभिषेको रुद्रकलशस्थे
नोदकेन एभिर्मंत्रैः॥ आपोहिष्ठेति नवर्चः॥ समुद्रज्येष्ठा इति चतस्रः॥ इमं मे गंगे०॥ कयानश्चित्र०॥ सहस्राक्षं शतधा
रमृषिभिः पावमानं कृतं॥ तेन त्वामभिषिंचामि पावमान्यः पुनंतु ते॥ भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः भ
गमिंद्रश्च वायुश्च भगं सप्तर्षयो ददुः॥ यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्द्धनि॥ ललाटे कर्णयोरक्ष्णोरापस्तद्घ्न ॥ ३ ॥
न्तु सर्वदा॥ सुरास्त्वामित्यादि॥ एवमभिषिंच्य वृषकर्णे मंत्रं जपेत्॥ धर्मस्त्वं वृषरूपेण जगदानंदकारकः॥
अष्टमूर्तेरधिष्ठानमतः पाहि सनातन॥ ततः तीक्ष्णशृंगाय विद्महे वेदपादाय धीमहि॥ तन्नो वृषः प्रचोदयात्॥

इति वृषगायत्र्या पूजयेत्प्रार्थयेच्च॥ ततः ऋषभं मा समानानां सपत्नानां मिति वृषप्रार्थना॥ ततो गवां वृषं
प्रार्थयेत्॥ गावो ममाग्रतः संतु गावो मे संतु पृष्ठतः॥ गावो मे हृदये संतु गवां मध्ये वसाम्यहं॥ पंचगावः समुत्प
न्ना मथ्यमाने महोदधौ॥ तासां मध्ये तु या नंदा तस्यै धेन्वै नमो नमः॥ या लक्ष्मीः सर्वभूतानां या च देवेष्वव
स्थिता॥ धेनुरूपेण सा देवी मम पापं व्यपोहतु॥ अयं हि वो मया दत्तः सर्वासां पतिरुत्तमः॥ तुभ्यं चैता मया दत्ता
पत्न्यः सर्वा मनोरमाः॥ ॥ इत्युक्त्वा सर्वमपि विवाहहोमं लाजादिना आचार्यो वृषान्वारब्धः कुर्यात्॥ ततो
ग्नेः पूर्ववदुदङ्मुखं वृषं कृत्वा ताम्रपात्रे प्राङ्मुखैरेव यवैस्तिलैश्च तत्पुच्छे तर्पणं कार्यं॥ वत्सतरीपुच्छमपि वृषपु
च्छे मेलयित्वा कुर्यादिति॥ तद्यथा॥ पूर्वोक्त एवं गुणविशिष्टायां पुण्यतिथौ देवर्षिपितॄणां दुर्गतिं गता
नां शतक्षये॥ आत्मनश्चाक्षय्यं संतानाविच्छेदार्थं वृषपुच्छे तर्पणमहं करिष्य इति संकल्प्य ब्रह्मादयो ये देवास्तान्देवान्
स्तर्पयामीत्यादि यथाग्र्यं तर्पणं कृत्वा ततः प्राचीनावीति दक्षिणमुखः॥ पित्रादित्रयीं मात्रादित्रयीं माता
महादित्रयीमित्यादि सर्वांस्तर्पयेत्॥ यावंतः स्मर्यंते तांश्च सर्वान्॥ ततः पुराणश्लोकैः स्तर्पयेत्॥ ब्रह्मा
द्या देवताः सर्वा ऋषयो मुनयस्तथा॥ असुरा यातुधानाश्च मातरश्चंडिकास्तथा॥ दिक्पाला लोकपाला

श्च ग्रहदेवाधिदेवताः ॥ ते सर्वे तृप्तिमायांतु नीलपुच्छे सुतर्पिताः ॥ विश्वेदेवास्तथादित्याः साध्याश्चैव मरुद्गणाः
॥ वृ॰प॰ ॥ द्या क्षेत्रपीठोपपीठानि निम्नगा नद्यश्च सागराः ॥ पाताळे नागपत्न्यश्च नागश्चैव सपर्वताः ॥ पिशाचा गुह्यकाः प्रेताः य
॥ ५ ॥ क्षगंधर्वराक्षसाः ॥ पृथिव्यापश्च तेजश्च वायुराकाशमेव च ॥ दिवि भुव्यंतरिक्षे च ये च पाताळवासिनः ॥ शिवः शि
वास्तथा विष्णु सिद्धिर्लक्ष्मीः सरस्वती ॥ तपोधनाश्च भगवान्व्यक्तः परमेश्वरः ॥ क्षेत्रौषधिलता वृक्षा वनस्पत्य
धिदेवताः ॥ कपिलः शेषनागश्च तक्षकोनंत एव च ॥ अन्ये जलचरा जीवा असंख्याता ह्यनेकशः ॥ चतुर्दश यमा
श्चैव ये चान्ये यमकिंकराः ॥ सर्वे पि यमराजानः पक्षिणः पशवस्तथा ॥ स्वेदजा उद्भिज्जा जीवा अंडजाश्च ज
रायुजाः ॥ अन्ये पि वनजा जीवा दिवा निशि विहारिणः ॥ अजागोमहिषीरूपा ये चान्ये पशवस्तथा ॥ शांति
दाः शुभदास्ते च नीलपुच्छे सुतर्पिताः ॥ आब्रह्मस्तंभपर्यंतं ये चान्ये गोत्रिणस्तथा ॥ ते सर्वे तृप्तिमायांतु नी
लपुच्छे सुतर्पिताः ॥ सर्पव्याघ्रहताश्चैव शृंगिदंष्ट्रिनिकाम्निभिः ॥ अपुत्राश्च अक्रिया ये च अपराध ॥ ५ ॥ ॥
मवर्जिताः ॥ आमगर्भामृता ये च शस्त्रघातमृताश्च ये ॥ संस्काररहिता ये च रौरवादिषु गामिनः ॥ आब्र
ह्मस्तंभपर्यंतं देवर्षिपितृमानवाः ॥ तृप्यंतु पितरः सर्वे मातृ ~~[illegible]~~ मातामहादयः ॥ अतीतकुळकोटी

सप्तद्वीपनिवासिनां ॥ आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकं ॥ पितृवंशे मृता ये च मातृवंशे तथैव च ॥ गुरुश्वशुरबंधू
नां ये चान्ये बांधवाः स्मृताः ॥ ये मे कुले लुप्तपिंडाः पुत्रदारविवर्जिताः ॥ क्रियालोपगता ये च जात्यंधाः पंगवस्तथा ॥ विरूपा
आमगर्भा ज्ञाताज्ञाताः कुले मम ॥ ते पि वै तु मया दत्तं वृषपुच्छे तिलोदकं ॥ ये बांधवा बांधवाश्च अन्यजन्मनि बांधवाः
ते सर्वे तृप्तिमायांतु वृषपुच्छे तिलोदकैः ॥ वृक्षत्वं च गता केचित्तृणगुल्मलताः स्थिताः ॥ यातनासु च घोरासु जातीषु
विविधासु च ॥ नरकेषु च घोरेषु पतिता ये स्वकर्मणा ॥ देवत्वं मानुषत्वं च तिर्यक्प्रेतपिशाचतां ॥ कृमीकीटपतंग
त्वं गता ये च स्वकर्मभिः ॥ तेषामुद्धरणार्थाय जलमेतद्ददाम्यहं ॥ आब्रह्मस्तंभपर्यंतं जगत्तृप्यत्विति ब्रुवन् ॥ ॥ २४ ॥
तर्पणांते पुत्रकामश्चेत्पादियजमानस्तर्हि दंपती उपवेश्य ॥ अद्येत्यादि सुपुत्रप्राप्त्यर्थं स्नानमहं करिष्ये ॥ इति सं
कल्प्य पूर्वकं सप्तधान्यफलान्वितं वंशपात्रे तु पुच्छान्येकीकृत्य तदुपरि उदकदानेन वारुमंत्रैः समुद्रज्येष्ठा इत्यादि ण
भिश्च स्नापयेत् ॥ वंशपात्रगलितोदकेन तथैव स्नात्वा उपविष्टौ दंपती आचार्यस्तु तस्तानि वस्त्राणि परित्यज्य व
स्त्रांतराणि परिधार्य पिंडदानमिश्रपिशिष्टसांप्रदायः ॥ एवं तर्पणं कृत्वा वेद्यां वृषस्य दक्षिणे खुरे पायसेन चरु
णाज्येन हविष्येण वा पित्रादिभ्यः सर्वेभ्यो दक्षिणामुखेन पिंडदानं कार्यं ॥ ये ये स्मर्यंते तेभ्यश्च ॥ तत्र मात्रादित्रये

॥वृषो०प०॥ स्पृथक्दद्यात्॥ पिंडदाने होमवच्छेषं दद्यात् श्राद्धमपि कार्यमिति केचित्॥ पिंडदानसंकल्पस्तु॥ पूर्वोक्तगुणवि
शिष्टे देशकालेऽस्मत्पितृणां स्वर्गार्थं आकल्पं तेषां ब्रह्मलोकनिवासार्थं दुर्गतिगतानां स्मर्यमाणानामस्मर्यमाणा
॥५॥ नां चोद्धारार्थमात्मनश्चाकल्पं संतानाविछेदार्थं वृषस्य धर्मरूपस्य दक्षिणखुरे पिंडदानमहं करिष्य इति एवं
सर्वेभ्यः पिंडान्दत्वा॥ अथ पुराणश्लोकैः पितृवंशे मृता ये च मातृवंशे तथैव च येऽमृताः॥ गुरुश्वशुरबंधूनां ये
चान्ये बांधवाः स्मृताः॥ ये मे कुले लुप्तपिंडाः पुत्रदारविवर्जिताः॥ क्रियालोपगता ये च जात्यंधाः पंगवस्तथा॥ वि
रूपा आमगर्भाश्च ज्ञाताज्ञाताः कुले मम॥ खुरे दत्तेन पिंडेन तृप्तायांतु गतिं च ते॥ वृक्षयोनिं गता ये च तिर्यक्
योनिं गताश्च ये॥ पंगुत्वं च गता ये च ये च नक्तलमागताः॥ आब्रह्मणो ये पितृवंशजाता मातुस्तथा वंशभवा म
दीयाः॥ वंशद्वये ये मम दासभृत्यास्तथैव चाश्रितसेवकाश्च॥ मित्राणि शिष्याः पशवश्च वृक्षा दृष्टाश्च स्पृ
ष्टाश्च कृतोपकाराः॥ जन्मांतरे ये मम संगताश्च तेभ्यः स्वधा पिंडमहं ददामि॥ १॥ अज्ञातदंता ये केचित्केचि ॥५॥
द्गर्भप्रपीडिताः॥ तेषामुद्धरणार्थाय इमं पिंडं ददाम्यहं॥ १॥ बंधुवर्गाश्च ये केचिन्नामगोत्रविवर्जिताः॥ स्वगो
त्रे परगोत्रे वा तेभ्यः पिंडं ददाम्यहं॥ २॥ उद्बंधनमृता ये च विषशस्त्रहताश्च ये॥ श्रृंगिभिर्दंष्ट्रिभिर्वापि तेभ्यः०३॥

अग्निदाहमृता ये च सिंहव्याघ्रहताश्च ये॥ आत्मोपघातिनो ये च तेभ्यः०४॥ अग्निदग्धाश्च ये केचिन्नाग्निदग्धास्त
थापरे॥ विद्युच्चौरहता ये च तेभ्यः०५॥ रौरवे चांधतामिस्रे कालसूत्रे च ये गताः॥ तेषा०६॥ असिपत्रवने घोरे कुंभी
पाके च ये गताः॥ तेषां०७॥ अनेकयातनासंस्था मृताः प्रेतेषु ये गताः॥ तेषा०८॥ असंख्यायातनासंस्था ये नीता यम
किंकरैः॥ तेषा०९॥ पशुत्वान्निर्गता ये च पक्षिकीटसरीसृपाः॥ अथवा वृक्षयोनिस्थास्तेभ्यः०१०॥ अन्यैर्दुर्मरणैर्ये च ब
धया वत्सपा मृताः॥ भूतप्रेतपिशाचाश्च तेभ्यः०११॥ दिव्यांतरिक्षभूमिस्थाः पितरो बांधवादयः॥ ते सर्वे तृप्तिमायां
तु पिंडदानेन सर्वदा॥१२॥ आसंसारसहस्राणि भ्रमंति स्वेन कर्मणा॥ मानुष्यं दुर्लभं येषां तेभ्यः०१३॥ ये केचित्प्रेत
रूपेण वर्तंते पितरो मम॥ ते सर्वे तृप्तिमायांतु पिंडदानेन सर्वदा॥ १४॥ ॥ एवं पिंडदानं कृत्वा सर्वपिंडदानशेषं
समापयेत्॥ पिंडदानदक्षिणां दत्वा ब्राह्मणैर्वृषखुरे पिंडदानं संपूर्णमस्तु॥ इति वाचयित्वा॥ पिंडोद्धरणादिसं
र्वं कृत्वा वृषवत्सतरीरग्निं प्रदक्षिणमन्वानीय॥ अग्नेः पूर्वतो दक्षिणखुरे त्रिशूलेन वामे चक्रेण चांकयित्वा वि
सर्जयेत् [illegible] मार्गं॥ केचित्त्रिशूलमात्रमिच्छंति॥ देशकालौ स्मृत्वामुं वृषं चतुर्विधमुक्तिवत्सतरीश्च तुष्
पयुतं यथाशाखं कृतं पितृणामुद्धारपूर्वकमाकल्पं ब्रह्मलोकप्राप्तये आकल्पं संतानाविछेदाय च ह

एतं युवानं इति मंत्रस्य याज्ञवल्क्य ऋषिः ॥ देवता त्रिष्टुप् छंदः एनं० १

षमुत्सृज्याग्निसंकस्य प्रान् मुत्सृजेत ॥ अरुं तत्पृष्ठे हस्तं कृत्वानुमंत्रयेत ॥ ॐ एतं युवानं पतिं वो ददामि तेन क्रीड
॥ हं०पं०॥ तीश्चरत प्रियेण ॥ मा नः शाप्त जनुषा सुभागा रायस्पोषेण समिषा मदेम ॥ ॐ शं नो पृथिवी शिवमंतरिक्षं द्यौर्नो
॥ ६ ॥ देव्यभयं कृणोतु ॥ शिवा दिशः प्रदिश उद्दिशो न आपो विद्युतः परिपांतु सर्वतः ॥ शांतिः ३ ॥ सर्वतो ब्रह्म स्वस्ति ब्रूयात्
वृषभमाति सूक्तस्य सुपर्ण ऋषिः ॥ वृषभो देवता अनुष्टुप् छंदः अंत्यस्य महापंक्तिः ॥ वृषभोपस्थाने विनियोगः ॥ वृषभं मा समा
नानामिति सूक्तं जपः ॥ कद्रुद्रायेति सूक्तस्य घोरः कण्वो रुद्रो गायत्री ॥ कद्रुद्रायेति सूक्तं जपांते वृषं दिगभिमुखं
कृत्वा ॥ गोभिः सह जलं पिब त्वमानिभक्षय यथेष्टं यूपं पर्यंटेति वदेत् ॥ अथ दक्षिणाभिमुखं कृत्वा ॥ इमा रुद्रा
येति सूक्तस्य कुत्सो रुद्रो जगती ॥ अंत्ये त्रिष्टुभौ ॥ इमा रुद्राय तवसे इति सूक्तं जपांते गोभिः सह स्यादि पूर्ववद्वदे
त् ॥ ततः प्रत्यङ्मुखं कृत्वा ॥ आ ते पितरिति सूक्तस्य ग्रत्समदो रुद्रस्त्रिष्टुप् ॥ आ ते पितरिति सूक्तं जपांते गोभिः
सहेति पूर्ववत् ॥ अथोदङ्मुखं कृत्वा ॥ इमा रुद्राय स्थिरधन्वने इति सूक्तस्य वसिष्ठो रुद्रो जगती ॥ अंत्या त्रिष्टु ॥ ६ ॥
प् इमा रुद्रायेति सूक्तं जपांते गोभिः सहेति पूर्ववत् ॥ ततो गच्छेति वृषं तु गच्छंतं सुवीत ॥ वृषो हि भगवान्धर्मो
मुक्तये वाहिका इमाः ॥ सारूप्यं च सामीप्यं सान्निध्यं च सलोकता ॥ इमास्तु रूपाः पत्न्यस्ते वत्स्यस्तव गोपते
वृष्यिताः ॥ क्रीडनार्थं वत्सया सार्धं व्रजं त्विमाः ॥ धर्मोसि त्वं चतुष्पादः स्मृते वत्सतरीस्त्विमाः ॥ चतुर्णां पोषणार्थं

यमेमोस्त्वं श्यास्त्वया सह ॥ देवतानां पितॄणां च मनुष्याणां च योगतः ॥ भूतानां तृप्तिजननास्त्वया सार्धं व्रजं त्विमाः ॥
नमो ब्रह्मण्यदेवाय ऋतर्षिपितृपोषक ॥ त्वयि मुक्ते सया लोका मम संतु निरामयाः ॥ वृषो हि भगवान्धर्मश्चतुष्पादः प्र
कीर्तितः ॥ वृणोमि तं महं भक्त्या स मां रक्षतु सर्वतः ॥ धर्मतत्त्वं वसंभूतिः स्वाहा त्वं च विभावसो ॥ वृषरूपेण सा देवी स
र्वकामप्रदा भव ॥ अदितिर्देवमाता त्वं देवमाता तथेश्वरि ॥ धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥ गावो ममाग्रतः २
या लक्ष्मीः सर्वदेवानां या च देहे व्यवस्थिता ॥ धेनुरू० ॥ पंच गावः समुत्पन्ना मथ्यमाने महोदधौ ॥ तासां मध्ये तु या
नंदा तस्यै धेन्वै नमो नमः ॥ धर्मं देहि यशो देहि पुत्रं देहि तु संपदः ॥ एकोत्तरशतं चैव कुलानां तारयस्व मे ॥ रुद्रमा
या मया दत्ता पत्न्यस्त्वं वृषोत्तम ॥ पितॄणां तारणार्थाय पर्यटस्व महीमिमां ॥ खुराग्रैः क्षेपणैः सर्वैर्मम पापं व्यपो
हतु ॥ पितरस्तृप्तिमायांतु खुराग्रोत्क्षेपकैः कृतैः ॥ ये त्वां हिंसंति पापात्मानो नरकं यांतु ते क्षयं ॥ ये त्वां रक्षंति धर्मि
ष्ठाः स्वर्गं ते निवसंतु वै ॥ नव दर्पकृतो आर्ते नदीकूलविहारणे ॥ अक्षय्याः संतु मे लोकाः पूर्वजानां तु सोरभ
धनं संतानमारोग्यं बांधवानां विशोकतां ॥ ततः प्रदक्षिणीकृत्य वृषं तमभिवादयेत् ॥ तत्र मंत्राः ॥ धारणाद्भूम
स्त्या ऊर्ध्वमेणाविष्कृताः प्रजाः ॥ धरत्वं धर्मरूपेण वृषवत्सतरीत्रयतः ॥ धर्मे त्वं वृषरूपेण ब्रह्मणा निर्मितः पुरा

धेनुर्गावश्च नदोह्याः २

॥वृषो०प० ततोत्सर्गप्रभावेण मां मुद्धर महार्णवात् ॥ एवं नमस्कृत्य मंत्रवाद्यघोषेण स्वसीमांतं नीत्वा दक्षिणस्कंधे न प्रेरयीत
सृजेत् ॥ स वत्सतरी वृषो गाव अशनदोह्याः ॥ न वाह्यो सौ न वत्सक्षीरं पातव्यं केनचिद् ध्रुवं ॥ इति वचनात् ॥ ततआग
॥७॥ त्य चरणप्रक्षालनाचमनादि विधाय स्थापितदेवताभ्य उत्तर पूजां विधाय ॥ उत्तिष्ठेति मंत्रेण यांतु देवगणाः सर्वे
इति च विसृज्य सर्वं देवप्रतिमा आचार्याय दद्यात् ॥ रुद्रकलशः सोपस्करो रुद्रजापकाय देयः ततः प्रायश्चित्ता
दिहोमशेषं समापयेत् ॥ केचित्त्विष्टकृद्धोमं चैवेच्छंति ॥ ततो स्य वृषोत्सर्गकर्मणः परिपूर्णतासिद्ध्यर्थं शतं ब्राह्म
णान्यथोपपन्नेनान्नेन भोजयिष्ये इति संकल्पयेत् ॥ एतदशक्तौ पंचाशत् ॥ तदशक्तौ पंचविंशतिर्यथाश
स्पद्दषो क्ति र्वा ॥ ततोत्सर्गप्रतिष्ठासिद्ध्यर्थं आचार्यादि पूजनं करिष्य इति संकल्प्य यथाशक्ति वस्त्रालंकरणचंदन
माल्यादिभिराचार्यं संपूज्य यथाशक्ति तिलांबुदकुंभं हिरण्यं वासो दद्यात् ॥ तत्रांतरे तु सवत्सगां दक्षि
णां ॥ ततः पूर्ववद्देवब्राह्मणं संपूज्य यथाशक्ति दक्षिणा देया ॥ ततो भूयसीं दक्षिणां नानागोत्रेभ्यो ब्राह्मणे ॥७॥
भ्यो दद्यात् ॥ वृषवत्सतरीणां सर्वमलंकारादि चाचार्यो गृह्णीयात् ॥ ततः कांस्यपात्रे सहिरण्यमाज्यं प्रक्षिप्य
मुखावलोकनं कार्यं ॥ तत्र मंत्रः ॥ आज्यं तेजः समुद्दिष्टं आज्यं पापहरं स्मृतं ॥ आज्यं सुराणामाहारमा

ज्ये लोकाः प्रतिष्ठिताः ॥ ततो न्यूनातिरिक्तपरिहारप्रार्थनामिति ॥ ततो यजमानस्य कलशोदकेनाभिषेकः ॥
पूर्वोक्तमंत्रैः ॥ ततो ब्राह्मणै राशिषो देयाः ॥ ततो ब्राह्मणान्भोजयित्वा स्वयं भुंजीत बंधुभिर्मित्रादिभिश्च सहि
तः ॥ एवं यथोक्तविधिना युक्तनीलं समुत्सृजेत् ॥ सर्वां सिद्धिमवाप्नोति यथा ते ब्रह्मचारिण इत्यादिभिः फल
कथनं विस्तरभयान्नोक्तं हेमाद्र्यादौ द्रष्टव्यं ॥ ॥ ॥ इति श्री विद्वन्मुकुटमाणिक्य श्रीमद्रामेश्व
रभट्टसुत श्रीनारायणभट्टविरचिता वृषोत्सर्गपद्धतिः समाप्ता ॥ ॥ श्रीमदार्या दुर्गार्पणं ॥ ॥
॥ आश्वलायनः ॥ उत्क्रांतानां तु सुगतिं वृषोत्सर्जनान्नरः कुर्याच्च सर्वपापानामपनुत्त्यै यथाविधि ॥ १ ॥
तथा ॥ वृषोत्सर्जनं नाम सर्वयज्ञोत्तमोत्तमं ॥ एतत्कृत्वा विधानेन मुच्यते सर्वपातकैः ॥ २ ॥ ज्ञानाज्ञानकृते
मर्त्यैः कोटिजन्मकृतैरपि ॥ तस्मात्सुदुर्लभतरं शिवप्राप्तिकरं नृणां ॥ ३ ॥ ॥ ॥ शुभं भूयात् ॥ ॥ श्रीः
॥ श्रीः ॥ वेदांकसप्तयुक्शाके नंदने हायने गुरौ ॥ सीताराम्मो लिखत्शोभां वृषोत्सर्जनपद्धतिं ॥ १ ॥ ॥ श्रीः
पुत्री पुत्र विवाहयोरुत्तर तत्र मास एवांतरे पित्रोर्मासिकेषु विधिवद् दीक्षितैः चरेयेत् दर्शनं वत्सीपूर्वकं वसहितं तिडानि के यिक्त तथा
पसव्यं तिलतर्पणं यवपनं दत्तं स्थित्वा समर्पयेत् इति

॥ हयोत्सर्गे ॥

॥ ८ ॥

॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥ ॥इति हयोत्सर्गपद्धतिः समाप्तिः॥ ॥श्रीशुभंभूयात्॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥

॥८॥